# Draunikritam Rudra Stotram

# દ્રૌણિકૃતં રુદ્રસ્તોત્રમ્

## Document Information

Text title : Draunikritam Rudra Stotram

File name : drauNikRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | sauptikaparva | adhyAya 7/2-11||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 15, 2025

*sanskritdocuments.org*

# દ્રૌણિકૃતં રુદ્રસ્તોત્રમ્

દ્રૌણિરુવાચ ।
ઉગ્રં સ્થાણું શિવં રુદ્રં શર્વમીશાનમીશ્વરમ્ ।
ગિરિશં વરદં દેવં ભવં ભાવનમવ્યયમ્ ॥ ૨॥

શિતિકણ્ઠમજં શક્રં ક્રથં ક્રતુહરં હરમ્ ।
વિશ્વરૂપં વિરૂપાક્ષં બહુરૂપમુમાપતિમ્ ॥ ૩॥

શ્મશાનવાસિનં દૃપ્તં મહાગણપતિં પ્રભુમ્ ।
ખટ્વાઙ્ગધારિણં મુણ્ડં જટિલં બ્રહ્મચારિણમ્ ॥ ૪॥

મનસાપ્યસુચિન્ત્યેન દુષ્કરેણાલ્પચેતસા ।
સોઽહમાત્મોપહારેણ યક્ષ્યે ત્રિપુરઘાતિનમ્ ॥ ૫॥

સ્તુતં સ્તુત્યં સ્તૂયમાનમમોઘં ચર્મવાસસમ્ ।
વિલોહિતં નીલકણ્ઠમપૃક્તં દુર્નિવારણમ્ ॥ ૬॥

શુક્રં વિશ્વસૃજં બ્રહ્મ બ્રહ્મચારિણમેવ ચ ।
વ્રતવન્તં તપોનિત્યમનન્તં તપતાં ગતિમ્ ॥ ૭॥

બહુરૂપં ગણાધ્યક્ષં ત્ર્યક્ષં પારિષદપ્રિયમ્ ।
ગણાધ્યક્ષેક્ષિતમુખં ગૌરીહૃદયવલ્લભમ્ ॥ ૮॥

કુમારપિતરં પિઙ્ગં ગોવૃષોત્તમવાહનમ્ ।
તનુવાસસમત્યુગ્રમુમાભૂષણતત્પરમ્ ॥ ૯॥

પરં પરેભ્યઃ પરમં પરં યસ્માન્ન વિદ્યતે ।
ઇષ્વસ્ત્રોત્તમભર્તારં દિગન્તં ચૈવ દક્ષિણમ્ ॥ ૧૦॥

હિરણ્યકવચં દેવં ચન્દ્રમૌલિવિભૂષિતમ્ ।
પ્રપદ્યે શરણં દેવં પરમેણ સમાધિના ॥ ૧૧॥

ઇમાં ચાપ્યાપદં ઘોરાં તરામ્યદ્ય સુદુસ્તરામ્ ।

સર્વભૂતોપહારેણ યક્ષ્યેઽહં શુચિના શુચિમ્ ॥ ૧૨॥

ઇતિ મહાભારતે સૌપ્તિકપર્વણિ ૭ અધ્યાયાન્તર્ગતં
દ્રૌણિકૃતં રુદ્રસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । સૌપ્તિકપર્વ । અધ્યાય ૭/૨-૧૧॥

mahAbhArata . sauptikaparva . adhyAya 7/2-11..

Proofread by PSA Easwaran

---

*Draunikritam Rudra Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*